M-779
Checked 2012
कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र M779 विषय पुराण
नाव.
लेखक/लिपीकार
पृष्ठ 5 काळ
पूर्ण/अपूर्ण

श्रीगणेशाय नमः ॥ अथ बौधायनोक्त लिंगप्रतिष्ठाविधिः ॥ देवकृ
दिनहस्तं ॥ देशकालौ संकीर्त्य मम शाश्वतशंलोकावाप्तिकाम
मया श्रीपरमेश्वरप्रीत्यर्थं लिंगप्रतिष्ठां करिष्ये ॥ तदंगं गणपति
पूजनपूर्वकं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं आचा
र्यऋत्विग्वरणं च करिष्ये ॥ प्रतिसंकल्प्य तत्त आचार्यः ॥ यदत्र
संस्थितं भूतं स्थानमाश्रित्य तिष्ठतु ॥ स्थानं संत्यक्त्वा तु तत्सर्वं यत्र
स्थं तत्र गच्छतु ॥ अपक्रामंतु भूता ॥ इति सर्षपान् विकीर्य दिक्षुत्तां
जलिखनस्थापनं ततो भित्ति विधिवाद्देवयजनं रपस्या ततं कृत्सा ॥
शुचीनरतिचरचेन पंचगव्येन सर्वान् संपादितद्रव्यान् प्रो
क्ष्य ॥ आपोहिष्ठेति त्रिऋचेन शुद्धोदकेन प्रोक्ष्य ॥ प्रासादे शंकु
रोपणादि प्रतिमादीनां स्थापनं पूजनं बलिदानं सूत्रवेष्टनं दु
ग्धधारां जलधारां च कुर्यात् ॥ ततः आचार्यः निशां पंचग
व्येन हिरण्यदुर्वांकुरयवाश्वत्थपलाशपर्णमिश्रोदकेन लिं
गमभिषिंचेत् ॥ इमं मे चैः आपोहिष्ठेति तिसृभिः हिरण्य

लिंग ग
ग।२५

वर्णा इति चतसृभिः पवमानानुवाकेन व्याहृतिभिश्च यत
तो पुष्पफलदूर्वासितापवान्यादायपाठेन मस्तके रुद्रमन्यव
इति निक्षिप्य लिंगं स्थापयित्वा रक्षोहणं वाजिनमिति
प्रतिसरं बध्वा संपूज्य वाससा कुशैश्चाच्छाद्य ॥ अवते
हेळो दुत्तममिति जले निवासयति ॥ अथ द्वितीयेह्नि लिंगत्तो
भद्रस्य प्रतिद्वारं कलशान् स्थापयित्वा जलाल्लिंगमु
त्थापयेत् ॥ उत्तिष्ठ ब्रह्मणस्पते इत्यनेन ॥ ततो व्रोधापनो
त्कं पुण्याहं वाचयित्वा ॥ स्वागतं देव देवेश विश्वरूप नमो
स्तु ते ॥ शुद्धेपि स्वधिष्ण्ये शुद्धि कर्म सह स्व तां ॥ इति
त वल्मीकमृत्कूपावेरनुलिप्य शुद्धोदकेन स्नापयेत् ॥ गा
यत्रिया गोमूत्रं ॥ गंधद्वारामिति गोमयं ॥ आप्यायस्वेति पयः ॥
दधिक्राव्णइति दधि ॥ घृतं मिमिक्षे इति घृतं ॥ देवस्यसेति
कुशोदकं ॥ आपोहिष्ठेति लोडनं ॥ एवं पंचगव्यं संपाद्य तेन ॥ न
मस्ते रुद्र मन्यव इति अष्टभिः स्नापयित्वा ॥ शमीपालाशख

दिरबिल्वाश्वत्थवैकंकतन्यग्रोधपनसाम्रशिरीषोदुंबरपू
ष्पाणां त्वक्कषायकलशोदकेन ॥ अश्वत्थेवोनिषदनमिति अ
भिषिंचति गमणिमृत्प्रवाहपुलकलशोदकेन ॥ हिरण्यव
र्णाइत्यभिषिंच्य ॥ अद्भिः संसृमितियाहृधातोत्तारणार्थेके चि
त् ॥ आहुः ॥ लिंगपीठांतरे निवेश्य युवं वस्त्राणीति वस्त्रयुग्मं
दत्वा ॥ गंधपुष्पधूपदीपैः संपूज्य ॥ तैजसपात्रे स्थमधु सुव
र्णशलाकया ॥ हीलौ तेन नेत्रोन्मीलनं कुर्यात् ॥ तत्रादौ ब
लिं प्रदद्यात् हिरण्यगर्भ इत्यष्टभिः ॥ अष्टौ दीपान् प्रदर्शयेल्लौ
स्थापयित्वा पश्चात् सुवर्णशलाकया ॥ चित्रं देवानामिति मं
त्रेण स्वयं पार्श्वे स्थित्वा सत्तुर्यघोषैः रक्षैः केनेत्रसमुन्मील
येत् ॥ तदानु कश्चित् पुरतस्तिष्ठेत् ॥ ॐ नमो भगवते रुद्राय
हिरण्यरेतसे परात्परस्मा इत्यनेन विश्वरूपाय उमाप्रियाय नमइ
ति संलिख्य ॥ अजंति त्वेति मधुना नेत्रौ कार्यं ॥ न्वाण लिंगोप्युति
केचित् ॥ आपायीपरस्वेव सांगोदधात् ॥ ततो देवं ध्याप्य कुशा
मस्तरेषु भाव स्तेणाश्वाघ प्राक् शिरसं देवं शाययेत् ॥ प्रजाप

लिंग॰ ॥२॥

सोपंपूर्त्तौ स्तुरस्तु स्रू॥ ततः आचार्यः॥ स्थंडिलकरणाद्यग्निप्र
तिष्ठाप्य॥ ध्यात्वा समित्त्रयमादाय अस्मिन् क्रियमाणे लिंगप्र
तिष्ठाहोमे देवतापरिग्रहार्थं अन्वाधानं करिष्ये॥ प्रधानं श्री
रुद्रं [illegible] पंचाशदधिकं शतसंख्याकाभिः॥ आज्याहुति
भिः भवाय देवाय स्वाहेति अष्टभिरष्टौ तिलोदनेन भव
स्य देवस्य स्वाहेति अष्टभिरष्टौ गुडोदनेन भवस्य देवस्य सु
ताय स्वाहेत्यष्टभिरष्टौ हरिद्रोदनेन त्र्यंबकाद्यष्टादशाभिः
श्रितहविस्त्रयेण शेषेण स्विष्टकृतमित्यादि आज्यभागांतं कु
र्यात् प्रधानहोमः॥ यात इषुः शिवतमेत्यनुवाकशेषेण॥ द्रापे
अंधसस्पते॥ सहस्राणि सहस्रशः इत्यनुवाकाभ्यां च प्र
तिमंत्रमाज्येन जुहुयात्॥ सर्वो वै रुद्र इति लिंगमूर्त्तं स्पर्शेत्॥
पूर्ववत् पुनस्तानभिहुत्वा कद्रुद्राय तस्मै ध्यं स्पर्शेत्॥ पुनस्तानभि
हुत्वा नमो हिरण्यबाहवे इत्यनेन स्पर्शेत्॥ पुनस्तानभिहुत्वा॥
संपूर्णेन रुद्रेण सर्वं स्पर्शेत्॥ उदुत्यं जातवेदसमिति लिं

॥२५

गमुत्थाप्य सद्योजातमिति पंचानुवाकैः देवतानयं प्रवि
श्य मणिमुक्ताप्रवालसुवर्ण[illegible]र्णरजितानगर्तमध्ये स्थाप
यित्वा॥ नमस्ते रुद्र मन्यव इति लिंगं स्थापयेत्॥ अथ गंध
पुष्पधूपदीपाद्यैः कामधुखालिप्तौ स्नापय आवाहनं करोति॥
ॐ भूः पुरुषमावाहयामि॥ ॐ भुवः पुरुषं आवाहयामि॥ ॐ स्वः
पुरुषं आवाहयामि॥ ॐ भूर्भुवस्वः पुरुषमावाहयामि॥ ततो देवं स्पृ
ष्ट्वा॥ ध्रुवा द्यौर्ध्रुवा पृथिवी॥ इति वैधितिचतस्रः ऋचो जपित्वा॥
प्रणवेन तंगन्यासः॥ प्राणप्रतिष्ठां कुर्यात्॥ अस्य श्रीप्राणप्रतिष्ठा
मंत्रस्य ब्रह्माविष्णुमहेश्वरा ऋषयः॥ ऋग्यजुःसामानि छंदांसि॥
परा प्राणशक्तिर्देवता॥ आं बीजं॥ ह्रीं शक्तिः॥ क्रौं कीलकं॥ प्राण
प्रतिष्ठापने विनियोगः॥ पृथिव्यप्तेजोवाय्वाकाशात्मने॥
अंगुष्ठाभ्यां नमः॥ शब्दस्पर्शरूपरसगंधात्मने तर्जनीभ्यां नमः॥
त्वक्चक्षुश्रोत्रजिह्वाघ्राणात्मने मध्यमाभ्यां नमः॥ वाक्पाणिपा
दपायूपस्थात्मने अनामिकाभ्यां नमः॥ प्राणापानव्यानोदानस
मानात्मने कनिष्ठिकाभ्यां नमः॥ मनोबुध्यहंकारचित्तात्मने क

॥लिं॰ग॰ ॥७॥

रतलकरपृष्ठाभ्यां नमः ॥ एवं हृदयादिन्यासः ॥ अथ ध्यानं ॥
रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः पाशं को-
दंडमिक्षुद्भवमतिगुणमकरेरंकुशः पंचबाणान् ॥ बिभ्राणासृ-
क्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भ-
वतु सुखकरी प्राणशक्तिः परा नः ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं
सं हं हंसः सः सोहं देवस्य प्राणा इह प्राणाः ॥ एवं देवस्य जीव इह स्थि-
तः ॥ एवं देवस्य सर्वेंद्रियाणि ॥ वाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्रा-
णापानव्यानोदानसमानाः इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा ॥
अस्यै प्राणाः प्रतिष्ठंतु अस्यै प्राणाः क्षरंतु च ॥ अस्यै देवस्यमर्चा-
यै मामहेति च कश्चन ॥ इति प्राणप्रतिष्ठां कृत्वा ॥ यजमानः ॥ देव-
स्य दक्षिणकर्णे गायत्रीं जपेत् ॥ स्वागतं देवदेवेशयया हेगमिहा-
गताः ॥ स्वान्निध्यं सर्वदा देवस्वार्चायां परिकल्पयेत् ॥ ततो रत्ना-
लंकृतेनाभिषिंचयेत् ॥ प्रणवेन कूर्चासनं दद्यात् ॥ दूर्वाविष्णुक्रां-
त श्यामाकपद्मपत्रकलशेन पाद्यं ॥ एलालवंगकंकोलकर्पूर-

मिश्रोदकेन आचमनीयं ॥ आपः ॥ क्षीरकुशाग्रैरक्षततोयैर्यवतंडु-
लैस्तिलैः सिद्धार्थकैः अर्घ्यं ॥ इमा आपः शिवाः शिवतमाः पू-
ताः पूततमा मेध्या मेध्यतमा अमृता अमृतरसाः पाद्या आचम-
नीया अर्घ्यास्तां जुषंतां प्रतिगृह्यतां प्रतिगृह्णातु ॥ भगवान्
महादेवो रुद्राय वै नमः ॥ इति अनेन पद्यार्थमुक्तेन पाद्यमाचम-
नीयमर्घ्यं च दद्यात् ॥ स्नानपर्यंतं अस्य मंत्रस्यावृत्तिः ॥ नमो
अस्तु नीलग्रीवायेति प्रतिरसं वस्त्रं स्थापयति देवं नमस्कृत्य सर्वे
मे गंधाः ॥ शुभ्रा दिव्याः सर्वगंधैरलंकृताः ॥ पूता ब्रह्मपवित्रेण
पूताः सूर्यस्य रश्मिभिः ॥ प्रतिगृह्यतां प्रतिगृह्णातु ॥ नमः इति गं-
धं ॥ इमे पुष्पा इत्यादि पुष्पाणि ॥ वनस्पति इत्यादि धूपः ॥ ज्यो-
तिः शुक्रं च तेजश्च देवानां सततं प्रियं ॥ प्रभाकरः सर्वभूतानां दी-
पोयं प्रतिगृह्यतां प्रतिगृह्णातु भ॰ नमः इति दीपं ॥ ३ ॥ सरूपाय संगु-
डोदनं हरिद्रोदनं नम हरिद्रोदनं इति हविषि ॥ पवित्रैते वितत-
मिति नैवेद्यं ॥ तांबूलं ॥ दक्षिणा ॥ नीराजनं च दद्यात् ॥ भवाय

देवाय नमः ॥१॥ ॐ शर्वाय नमः ॥२५ ॐ ईशानाय नमः ॥३५ पशुप
तये नमः ॥४५ रुद्राय नमः ॥५५ उग्राय नमः ॥६५ भीमाय नमः ॥७५
महतो देवाय नमः ॥८५ एभिः पुष्पांजलिं दत्वा गणे रेतैरेव मं
त्रैस्तर्पयति ॥ ततः तिलोदनं गुडोदनं हरिद्रोदनं हवींषि जुहु
यात् ॥ ॐ आदौ भवाय देवाय स्वाहा सप्तभिः तिलोदनं ॥ भवस्य दे
वस्य पत्न्यै स्वाहा सप्तभिः गुडोदनं ॥ भवस्य देवस्य सुताय स्वा
हा सप्तभिः हरिद्रोदनं च जुहुयात् ॥ त्रिणि हविंष्येकीकृत्य जुहुया
त् ॥ त्रियंबकं० मानो महांतं २ मानस्तोके त० ॥३५ आराते गोघ्न० ॥
४५ विकिरिद विलो० ॥५५ सहस्राणि सहस्रशो ये० ॥६५ एताभिरे
काहुतिं हुत्वा ॥ शिवाय नमः स्वाहा ॥ शंकराय नमः स्वाहा २ सहमाना
य० ॥३५ शितिकंठाय० ॥४५ कपर्दिने० ॥५५ ताम्राय० ॥६५ अरुणाय० ॥
७ ॥ अपगुरमाणाय न० ॥८ ॥ हिरण्यबाहवे न० ॥९५ सस्पिंजराय न० ५
१० ॥ बभ्रुशाय न० ॥११५ हिरण्याय स्वाहेति पूर्ववदेताभिर्हुत्वा स्वि
ष्टकृतादि होमशेषं समाप्य हविःशेषेण बलिं दद्यात् ॥ तत्र मंत्रः ॥
सोमेकमाद्यं पुरुषं पुराणं रुद्रं शिवं विश्वसृजं प्रपद्ये मेहे ॥ बलये

वपश्शोषिहितोविधाय स्वमात्मनात्मप्रतिगृह्णीयाद्धव्यं ॥ अथा
न्येनाग्निमथ्य स्थपर्जन्युत्तरे पंभिद्धाति ॥ भूर्भुवः स्वरोमिति
त्रिः ॥ ततः आचम्य अग्ने नय सुपथा राये अस्मान्ः प्रदक्षिणां कृत्वा ॥
विश्वभुजे नमः ॥ सर्वभुजे नमः ॥ आत्मने नमः ॥ परमात्मने नमः ५
इति नमस्कृत्य तस्य कर्मणः सांगता सिद्ध्यर्थं द्वादश ब्राह्मणान्
भोजयिष्ये ॥ देवं प्रणिपत्य संप्रार्थयेत् ॥ यावच्चंद्रार्कौ वसुधी तिष्ठं
त्प्रतिष्ठा तिन ॥ तावदत्र यादेवेशस्ते यं भक्तानुकंपया ॥ इति
संप्रार्थ्य ॥ ततो नामकरणं ॥ तं नाम देवस्योत्तरपूर्वस्यां दिशा आ
चार्याय गां दद्यात् ॥ ब्राह्मणेभ्यः पभं ॥ स्वदक्ष्याश्वं ॥ ऋत्विग्भ्यो यथा
शक्ति दक्षिणां दद्यात् ॥ कर्म संपूर्णतां वाचयित्वा मे ऽपदेवता गि
र्यावि सृज्य कर्म समाप्नुयात् ॥ विष्णुं स्मरेदित्याह ॥ इति बौधायनोक्त
लिंगप्रतिष्ठाविधिः ॥ ॥ अथ सामग्री ॥ कुंकुम २ ॥ शिरपा २ पंच
गव्य ३ चरु ४ त्रिसूत्र ५ कुंकुम ६ दूर्वा ७ यव ८ अश्वत्थ ९ पालाश समि
धा १० पुष्प ११ फल १२ दूर्वा १३ दीप १४ नैवेद्य १५ प्रति वस्त्र १६ कुश १७

शिं ग०
॥५॥

समिधा गव्हाचा १८ कुलरा १९ दिवलान्या २० वल्मीकनपा २१
स्थंडिलास्यमृत्तिका ॥ २१ कूपाच २२ तोय २३ शमी २४ खदिर २५
बिल्वफले पत्रे २६ बैकंकत २७ वड २८ पनस २९ आंम्र ३० शिरसत्र
औदुंबर ३२ फूपरी ३३ तैलसपाने ३४ मधु ३५ वाती ३६ कुरा ३७
तिल ३८ हरिद्रा ३९ गुड ॥ पंचखाद्य ४० सुपारी ४१ विडचुनां ४२
मणिमौक्तिक ४३ प्रवाळ ४४ पंचरत्न ४५ सुवर्णशलाका ४६ अरसा ४७ इध्मा बर्हि ४८ पद्मपत्र ४९ एलालवंगादि ५० पुगस्या वासा
पर कर्पूर गंध कोल ५३ श्यामाक ५४ इति सामग्री ॥ शके १७०४
शुभकृन्नामाब्दे आषाढ कृष्ण ७ सौम्यवासरे तस्मिन् दिने गो
विंदात्मजेन यज्ञेश्वरभट्टेन लिखितं पुस्तकं बोधायनोक्त शिव
प्रतिष्ठाविधिः समाप्तः स्वार्थं परार्थं च ॥ ॥ छ ॥ छ ॥ छ